© 2018 IJSRSET | Volume 4, Issue 7, March-April-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 599-602

# संस्कृतशिक्षणे संरचनात्मकोपागमः



डॉ॰ दातारामपाठक.
संविदाध्यापकः, शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः

**शोधालेखसारः –** अस्माकं जीवने संरचनात्मकोपागमस्य अतीव उपयोगिता वर्तते। अस्योपयोगेन संस्कृतव्याकरणं, संस्कृतभाषा एवं च संस्कृतवाग्व्यवहारः सरलतया छात्राः अधिगच्छन्ति तथा च मनोवैज्ञानिकी शैलीमाध्यमेन अस्य प्रयोगः भवति। अतः अस्योपयोगः अस्माकं जीवने भवेत् एव ।
**मुख्य शब्दः–**आवृत्तिः, उपयोगिता, शिक्षणयोग्यता, संस्थया, संरचना।

1952 तमे आङ्ग्लभाषाशिक्षणार्थं प्रथमतः उपागमोऽयं उपयुक्तम्। भाषायाः वाक्यसंरचना तद्भेदाश्च प्रमुखतया अध्याप्यन्ते। तद्वारा भाषावगमनं प्रयोगावगमनं च छात्राणां भवति इति निरूपितः। उपागमोऽयं आदौ मद्रासनगरे आङ्ग्लभाषाध्यापने ब्रिटिश काऊँसिल (परिषद्) इति संस्थया प्रयुक्तः। संस्कृतभाषास्वरूपं सर्वमपि संस्कृतवाक्यसंरचनायां अन्तर्निहितम् इति कथने नास्ति। संरचना भाषायाः अभिभाज्यम् । संरचनाधारेण एव भाषायाः स्वरूपस्य आकृतिः पूर्णतां याति।

चयनं विभाजनं च- बोधनीयवाक्यानां संग्रहणम्। यथा- विभक्त्यभ्यासः । भूत-भविष्य-वर्तमानप्रयोगाः, अव्ययानां प्रयोगाः, अविकारी-कर्तुकर्मभावप्रयोगाः अंशाः परिशीलनीयाः।

1.आवृत्तिः 2. उपयोगिता 3. शिक्षणयोग्यता 4. निर्माणयोग्यताग्ता। एतेषां विवरणं अधः प्रस्तूयते।

**(1) आवृत्ति** - यस्य (पाठांशस्य) विभिन्नसन्दर्भेषु आवृत्तिः भवति। तस्यांशस्य भेदावगाहनपूर्वकः अभ्यासः करणीयः।

**(2) उपयोगिता –** अभ्यस्तविषयं छात्राः उपयुञ्जीरन्। अन्यथा सः अभ्यासः अर्थः स्यात् । पष्ठसप्तमकक्षयोः विभक्त्याभ्यासः पर्याप्तोभवति चेत् तावदेव बोधनीयम् । कर्मणि प्रयोगः बोधनेन तस्य उपयोगिता क्षमता न भवति ।

(3) **शिक्षणयोग्यता**: - स्वीकृतांशस्य शिक्षणयोग्यता भवेत्। यथा– छात्र: श्लोकम् इति बोधयितुं सरलं “किन्तु सूर्य: प्रतिदिनं प्राच्यं दिशि उदेति’ इत्यस्य पाठने क्लेश: उत्पादयति। प्राथमिकस्तरे ईदृशानि वाक्यानि अभ्यासक्लेशं उत्पादयति ।

(4) **निर्माणयोग्यता**:-पठितांशस्याधारेण नूतनं सर्जनं कर्तुं प्रयतेरन् छात्रा: तादृशा: योग्यांशय: स्वीकरणीया:।

**परिभाषा अर्थश्च -**

संरचनाया: अथवा संग्रन्थनस्य सामान्यार्थ: भवति बन्धनं, योजनं वा। एतस्या: एक: नाम वाक्यघटनोपागम: इत्यपि परिभाषा– “शब्दानां विभिन्नरूपेण वाक्येषु ग्रन्थनमेव संग्रन्थनम् इति।“ आंग्लभाषायां Structural Approch इति नाम अस्ति ।

**संरचनात्मकोपागमस्यगुणा**: -

संरचनात्मकोपागमस्य बहवो हि गुणा: वर्तन्ते। अस्योपागमस्य माध्यमेन एव विद्यालयस्तरे उपयुक्तं रोचकं, सुग्राह्यं च कर्तुं संस्कृतव्याकरण–नियमानां ज्ञानप्रदानाय उपागमोऽयं अत्यन्तोपयुक्त: विद्यते। अस्योपागमस्य केचनगुणा: अधोलिखितं वर्तन्ते–

1. संरचनात्मकोपागमे भाषाशिक्षणस्य मनोवैज्ञानिकी शैली वर्तते।
2. उपागमेऽस्मिन् सरलवाक्यानां प्रयोगं कृत्वा छात्राणां समक्षे उपस्थाप्यन्ते।
3. संरचनात्मकोपागमस्य प्रयोगद्वारा छात्राणां मौखिकाभिव्यक्ते: विकास: भवति।
4. संस्कृतकक्षायां संस्कृतस्य प्रयोग: अनिवार्यरूपेण क्रियते।
5. संस्कृतभाषाया: यानि चत्वारि कौशलानि वर्तन्ते तेषु कौशललेषु दक्षता समागच्छति।
6. अस्योपागमस्य प्रयोगमाध्यमेन व्याकरणस्य नियमान् छात्रा: सरलरूपेण अधिगच्छन्ति।
7. अस्योपागमे ये अधिगमसिद्धान्तस्य नियमा: वर्तन्ते तेषां प्रयोग: अत्र क्रियते।
8. उपागमेऽस्मिन् भाषा मधुरा, मनोनुकूला, सरला एवं सरसा भवति ।

संरचनात्मकोपागमस्य प्रयोगसमये छात्राणां स्तरं अवश्यं मनसि निधाय एव पाठनीय: । अस्योपागमस्य प्रयोग: सर्वस्तरीयानां छात्राणां कृते संस्कृतशिक्षणाय नितराम् प्रयुज्यते।

**संरचनात्मकोपागमस्य निर्माणप्रक्रिया**: -

संरचनात्मकोपागमस्य निर्माणप्रक्रियायां बहवो विन्दव: वर्तन्ते, किन्तु प्रमुखरूपेण केचन विन्दव: वर्तन्ते। तद्यथा–

© 2018 IJSRSET | Volume 4, Issue 7, March-April-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 599-602

1. पदानां क्रमः।

2. उपसर्गनिपातादीनां प्रयोगः।

3. विभक्तीनां प्रयोगः।

**(1) पदानां क्रमः** - उपागमेऽस्मिन् पदानां क्रमः महत्त्वपूर्णाः वर्तन्ते। पदस्य एकः व्यवस्थितः क्रमः वर्तते, तेनेव क्रमेण पदान् स्थापनीयाः। यथा- कर्ता-कर्म-क्रियादीनां क्रमः तु निर्दिष्टम् अस्ति ।

**(2) उपसर्गनिपातादीनां प्रयोगः** - संरचनात्मकोपागमस्य निर्माणे उपसर्गनिपातादीनां प्रयोगः यथा स्थानं भवेत्। यथा उपसर्गस्य प्रयोगः क्रियापदस्य पूर्वं भवति एवं च चादिनिपातस्याऽपि प्रयोगः उचित स्थाने भवेत्।

**(3) विभक्तीनां प्रयोगः** - अस्योपागमे विभक्तीनां अपि प्रयोगः यथास्थानं स्यात् । यदि तस्य प्रयोग उचितरूपेण न भविष्यति चेत् बहवो हि दोषाः आगमिष्यन्ति। अतः तस्य प्रयोगः उचितस्थाने स्यात्।

**संरचनात्मकोपागमस्य सिद्धान्तः -**

1. भाषा प्राथमिकतया भाषणरूपा।

2. भाषणं विभिन्नाभ्यासानां समूहः भवति।

3. भाषाशिक्षणं न तु भाषाविषयक-शिक्षणम्। भाषाशिक्षणम् अर्थात् श्रवणं, भाषणं, पठनं, लेखनम्, इत्यादीनां शिक्षणं भवेत्।

4. भाषाः परस्परं भिन्नाः भवन्ति। प्रत्येकभाषायाः संरचनाऽपि भिन्ना भवति।

**संरचनात्मकोपागमस्य पाठयोजनायाः सोपानानि -**

संरचनात्मकोपागमस्य पाठयोजनायाः सोपानानि प्रमुख रूपेण षड एव सन्ति। तेषां विवरणम् अधः प्रस्तूयते-

**(1) प्रस्तावना-** अस्मिन् सोपाने संरचनात्मकोपागमस्य पाठयोजनायाः संक्षिप्तपरिचयः भवति।

**(2) उद्देश्यकथनम्-** द्वितीयसोपाने पाठयोजनायाः उद्देशस्य कथनं भवति। अस्मिन् विशिष्टम् एवं च सामान्यं द्विविधम् उद्देश्यं भवति।

**(3) प्रस्तुतीकरणं-** तृतीयसोपाने या पाठयोजना अस्ति तस्याः पाठयोजनायाः प्रस्तुतीकरणम् भवति। प्रस्तुतीकरणसमये सर्वे छात्राः ध्यानेन श्रृण्वन्ति। अस्मिन्नेव सोपाने त्रीणि उपसोपानानि वर्तन्ते - (क) प्रथमसंग्रथनम् (ख) द्वितीयसंग्रन्थनम् (ग) तृतीयसंग्रन्थनम्।

**(4) स्पष्टीकरणम्-** चतुर्थसोपाने स्पष्टीकरणं भवति।

(5) **अभ्यासकार्यम्**– पंचमसोपाने अभ्यासकार्यं भवति। पठितांशस्य अभ्यासः अस्मिन् भवति।

(6) **गृहकार्यम्-** पष्ठसोपाने छात्राणां कृते गृहकार्यं दीयन्ते। एते पाठयोजनायाः सोपानानि वर्तन्ते।

**निष्कर्षः –** निष्कर्षतः अस्माकं जीवने संरचनात्मकोपागमस्य अतीव उपयोगिता वर्तते। अस्योपयोगेन संस्कृतव्याकरणं, संस्कृतभाषा एवं च संस्कृतवाग्व्यवहारः सरलतया छात्राः अधिगच्छन्ति तथा च मनोवैज्ञानिकी शैलीमाध्यमेन अस्य प्रयोगः भवति। अतः अस्योपयोगः अस्माकं जीवने भवेत् एव ।

**सन्दर्भग्रन्थसूचीः**

1. संस्कृतशिक्षणम् – प्रो॰ सन्तोषमित्तल
2. शिक्षामनोविज्ञानम् – डॉ॰ फतेहसिंह
3. शैक्षिक प्रविधिः – डॉ॰ रमाकान्तमिश्र
4. संस्कृतशिक्षणम् – डॉ॰ कम्भम्पाटि साम्बशिवमूर्ति
5. संस्कृतशिक्षणम् – डॉ॰ एस.डी. सिंह
6. हिन्दी शिक्षण – श्री सुरेन्द्र सिंह कादियान
7. हिन्दी शिक्षण – डॉ. दाताराम पाठक